शर्करोदकं, क्ली, (शर्करायुक्तमुदकम् ।) शर्करायुक्तजलम्। चिनिरपाना इति शरवत् इति च भाषा । यथा,—

"जलेन शीतलेनैव घोलिता शुभ्रशर्करा।
एलालवङ्गकर्पूरमरिचैश्च समन्विता ॥
शर्करोदकनाम्नै तत् प्रसिद्धं विदुषां मुखे ।
शर्करोदकमाख्यातं शुक्लं शिशिरं सरम् ॥
बल्यं रुच्यं लघु स्वादु वातपित्तास्रनाशनम्।
मुर्च्छाच्छर्द्दितृषादाहज्वरशान्तिकरं परम् ॥"

इति भावप्रकाशः ॥

शर्द्धः, पुं, (शृधु शब्दकुत्सायाञ्च + घञ् ।) अपानोत्सर्गः। शृधधातोर्घञ्प्रत्ययेन निष्पन्नमेतत्॥ (तेजः । यथा, ऋग्वेदे । ४ । १ । १२ ।

"प्र शर्द्ध आर्त्त प्रथमं विपन्या ॥"

"शर्द्धस्तेजः ।" इति तद्भाष्ये सायणः ॥ समूहः । यथा, तत्रैव । १ । ६४ । १ ।

"वृष्णे शर्द्धाय सुमखाय वेधसे ।"

"शर्द्धाय समूहाय ।" इति तद्भाष्ये सायणः ॥ प्रसहनशीले, त्रि । यथा, तत्रैव ।१।३७।४।

"प्रवः शर्द्धाय घृष्वये त्वेष द्युम्नाय शुष्मिणे ॥"

'शर्द्धाय प्रसहनशीलाय ।' इति तद्भाष्ये सायणः॥

शर्द्धंजहः, पुं, (शर्द्धं जहातीति । हा + "एजेः खश् ।" ३ । २ । २८ । इत्यत्र । वातशुनीतिलशर्द्धेष्विति ।" खश् । "अरुर्द्दिषदजन्तस्यति।" ६ । ३ । ६७ । इति मुम् ।) माषः यथा । शर्द्धं आर्द्रत्वं जहाति इति शर्द्धंजहो माषः । इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥

शर्द्धनं, क्ली, (शर्द्ध + ल्युट् अधोवायुः । इति मनुटीकायां कल्लूक-भट्टः ॥ वातकर्म्म इति भाषा ॥

शर्व्व, हिंसे। गतौ। इति कविकल्पद्रुमः॥ शर्वति। इति दुर्गादासः ॥

शर्म्म,[न्] क्ली, (शॄ + "सर्व्वधातुभ्यो मनिन् ॥" उणा० ४ । १४४ । इति मनिन् ।) सुखम् । इत्यमरः ॥ (यथा, ऋग्वेदे । ४ । ३५ । ४ ।

"तस्मा अग्निर्भारतः शर्म्म यं सत् ।"

"शर्म्म सुखम् ।"इति तद्भाष्ये सायणः॥ यथाच कथासरित्सागरे । ७८ । ४९ ।

"स्वामिभक्तस्तदेतस्य शर्म्मोपायमिमं शृणु ॥")

तद्वति, त्रि ॥ गृहम् । इति निघण्टुः ।३।४॥ (यथाच ऋग्वेदे । ३ । १३ । ४ ।

"स नः शर्म्माणि वीतयेऽग्निर्यच्छतु शन्तमा ।"

"शर्म्माणि शर्म्मशब्दो गृहवाची छाया शर्म्मेति तन्नामसु पाठात् ।" इति तद्भाष्य सायणः ॥)

शर्म्मा,[न्] पुं, (शृणात्यशुभमिति । शॄ + "सर्व्वधातुभ्यो मनिन् ।" उणा० ४ । १४४ । इति मनिन् ।) ब्राह्मणस्योपाधिविशेषः । यथा,—

"शर्म्मन्नर्घ्यादिके कार्य्यं शर्म्मा तर्पणकर्म्मणि।
शर्म्मणोऽक्षय्यकाले च पितॄणां दत्तमक्षयम्॥"

शर्म्मन्नित्यनेन गोत्रसम्बन्धनामानि पितॄनां परिकल्पयन्नित्येकवाक्यतया शर्म्मान्तं नाम प्रतीयते । तथा च विष्णुपुराणम् ।

"ततश्च नाम कुर्व्वीत पितैव दशमेऽहनि ।
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम् ॥"

देवात् पूर्व्वं नराख्यं नरनाम तच्च विशिष्टं शर्म्मयुतम् । एतच्च विप्रपरम् ।

"शर्म्मा देवश्च विप्रस्य वर्म्म त्राता तु भूभुजः ।
भूतिर्द्दत्तश्च वैश्यस्य दासः शुद्रस्य कारयेत् ॥"

इति यमवचनात् ॥

अत्र चकारेण देवशर्म्मणोः समुच्चयः । अत्रापि शर्म्माद्यन्ततामाह शातातपः ॥

"शर्म्मान्तं ब्राह्मणस्य स्याद्वर्म्मान्तं क्षत्रियस्यच
धनान्तश्चैव वैश्यस्य दासान्तं चान्यजन्मनः॥"

इति श्राद्धतत्त्वम् ॥

(तथा च विष्णुपुराणे । २ । १० । ८—९ ।

"ततश्च नाम कुर्वीत पितैव दशमेऽहनि ।
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम् ॥
शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रसंश्रयम् ।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशुद्रयोः ॥"

"दशमेऽहनि अतीते इति शेषः तच्चाशौचान्तोपलक्षणम् । अत्रैव कालान्तरमप्याह । यथा,—

"नामधेयं दशम्याञ्च केचिदिच्छन्ति पार्थिव ।
द्वादश्यामथवा रात्र्यां मासे पूर्णे तथापरे ॥"

इति ॥

देवपूर्वं कुलदेवतानामपूर्वकं कुलदेवतासम्बन्धं नाम कुर्य्यात् इति शङ्खोक्तेः । नराख्यं पुरुषवाचकम् । तत्र प्रान्त शर्म्मवर्म्मादिसंयुतम् । यथा, सोमशर्म्मा इन्द्रवर्म्मा चन्द्रवर्म्मा चन्द्रगुप्तः शिवदासः इत्यादि ।"इति तट्टीकायां स्वामी॥

*तत्रादौ नाम निर्णयः ।

"शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रसंश्रयम्।
गुप्तदासात्मकं नाम प्रशस्त वैश्यशुद्रयोः ॥"

इत्यत्रेति पदस्वरसेन यद्यपि शर्म्मपदात्मकमेव नामावगम्यते तथापि तावन्मात्रं न नाम किन्तु तद्वन्नामेति निर्णीयते द्व्यक्षरं चतुरक्षरं इत्यादिगृह्यदर्शनात् । एवञ्च हरिशर्म्मा नारायणशर्म्मेत्यादि सिध्यति शर्म्मपदमात्रात्मकत्वात् तन्नाम्नश्चतुरक्षरता न स्यादेव । तथाच नारायणादिपदशर्म्मपदाभ्यां निर्णीतमेव नाम द्व्यक्षरादिकन्तु शर्म्मपूर्वप्रतिकमात्रमेव अतएव दानादौ नामोच्चारणे चैत्रशर्म्मणि इत्येव श्रूयते । गोभिलः ।

"शर्म्मन्नर्घ्यादिके कार्य्यं शर्म्मा तर्पणकर्म्मणि ।
शर्म्मणोऽक्षय्यकाले स्यादेवं कुर्व्वन्न मुह्यति ॥"

इदमप्युत्तरप्रतीकमात्रपरमुक्तगृह्येन सहैकमूलत्वात्। एतेन शर्म्म सुखनीयमिति कर्कदर्शनात् शर्म्मपदमर्थपरं तेन शुभङ्करेत्याद्येव नामेत्यपास्तं गोभिलविरोधात्। कर्कन्तु पूर्वप्रतीकमात्रपरम्। तेन शुभङ्करशर्म्मा भौमशर्म्मेत्यादि सिध्यति एवञ्च हव्यकव्ये चैतादृशमेव नाम तेषां प्रयोज्यम् । अपवादकाभावादिति । अत्रैव मनुः ।

"मङ्गल्य ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम्
वैश्यस्य धनसंयुक्तं शुद्रस्य तु जुगुप्सितम् ॥
शर्म्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम्।
स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम् ।
मङ्गल्यं दीर्घवर्णान्तमाशीर्व्वादाभिधानवत् ॥"

शर्म्मवर्म्मप्रभृतीनि उत्तरपदानि कार्य्याणीति मनुटीकापि । स्त्रीनाम तु यशोदादेवीत्यादि स्त्रीणां दान्तमित्यपि पूर्व्वप्रतीकमात्रपरम् । वैश्यस्य गुप्तान्तमिति तु पराशरः । एवञ्च दानादौ चैत्रशर्म्मणे ब्राह्मनायेत्यादि स्वरूपं वाक्यम् ॥" इतिद्वैतनिर्णयः ॥*॥)

शर्म्मरः, पुं, वस्त्रभेदः । इतिधरणिः ॥

शर्म्मरा, स्त्री, दारुहरिद्रा । इति धरणिः ॥

शर्य्या, स्त्री, रात्रिः । यथा,—

"त्रियामाशर्व्वरी शर्य्या क्षयणी क्षणदा क्षपा ।"

इति भरतधृतवाचस्पतिः ॥

(इषुः । यथा, ऋग्वेदे ।१ । १४ ।४ ।

"शर्य्यामसना मनुष्युन् ।" "शर्य्या इषवः शरमय्यः । इति यास्कः ॥"इति तद्भाष्ये सायणः ॥ अङ्गुलिः । यथा, तत्रैव ।९ ।११० ।५ ।

"शर्य्याभिर्नभरमाणोगभस्त्योः ।"

"शर्य्याभिरङ्गुलीभिः ।" इतितद्भाष्ये सायणः ॥

शर्य्यातिः पुं, वैवस्वतमनुपुत्त्रः। तस्य पुत्त्र आनर्त्तः यथा,—

"आनर्त्तो नामशर्य्यातेः सुकन्यानाम दारिका।
आनर्त्तस्याभवत् पुत्त्रो रोचमाणःप्रतापवान् ।
आनर्त्तो नाम देशोऽभून्नगरी च कुशस्थली॥"

इति मात्स्ये १२ अध्यायः ॥

(अस्य विशेषविवरणं भागवते ८ । १२ ॥ एवं ९ । १ । अध्याये च द्रष्टव्यम् ॥)

शर्व, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा०- पर० सक०-सेट् ।) शर्वति । इति दुर्गादासः ॥

शर्वः पुं, (शृणाति सर्वाः प्रजाः संहरति प्रलये संहारयति वा भक्तानां पापानि । शॄ + "कॄ + गॄ शॄ दॄ भ्यो वः ।" उणा० १।१५५। इति वः ।) शिवः । इति हेमचन्द्रः ॥ (यथा, रघुवंशे। ११ । ९३ ।

"कतिचिदक्षमिपासः शर्वरीः शर्वकल्पः ॥")

दन्त्यसादिरप्ययम् । विष्णुः । यथा,—

"शर्वः सर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।"

इति तस्य सहस्रनामस्तोत्रम् ॥

शर्वरं, क्ली, तमः । कन्दर्पः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शर्वरी, स्त्री, (शृणाति चेष्टामिति । शॄ + "कॄ गॄ शॄ वृचतिभ्यः ष्वरच् ।" उणा० २ । १२२ । इति ष्वरच् । षित्वात् ङीष् ।) रात्रिः । इत्यमरः॥ (यथा, ऋग्वेदे । ५ । ५२ । ३ ।

"अतिस्कन्दन्ति शर्वरीः ॥")

योषित् । इति मेदिनी ॥ हरिद्रा । इति विश्वः॥ सन्ध्या । इति संक्षिप्तसारोणादिवृत्तिः ॥

शर्वला, स्त्री, तोमराख्यम् । इत्यमरटीकायां रायमुकुटः॥ दन्त्यसादिरप्ययम् ॥

शर्वाणी, स्त्री, (शर्वस्य भार्य्या । "इन्द्रवरुणभवेति ।" ४।१।४९ । इति ङीष् ।) पार्वती ।